# શ્રીગુરુવાયુપુરેશસુપ્રભાતમ્

## Shri Guruvayupuresa Suprabhatam

sanskritdocuments.org

December 1, 2018

Shri Guruvayupuresa Suprabhatam

# શ્રીગુરુવાયુપુરેશસુપ્રભાતમ્

## Sanskrit Document Information

Text title : Guruvayurappan Suprabhatam

File name : guruvAyurappansuprabhAtam.itx

Category : vishhnu, krishna, suprabhAta

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com, PSA Easwaran

Latest update : November 24, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 1, 2018

*sanskritdocuments.org*

# શ્રીગુરુવાયુપુરેશસુપ્રભાતમ્

ઉત્તિષ્ઠ કૃષ્ણ ગુરુવાયુપુરેશ શૌરે
ઉત્તિષ્ઠ દેવ વસુદેવસુપુણ્યમૂર્તે ।
ઉત્તિષ્ઠ માધવ જનાર્દન રાધિકેશ
ત્રૈલોક્યમેતદખિલં કુરુ મઙ્ગલાઢ્યમ્ ॥ ૧॥

શ્રીજામદગ્ન્યભુવિ સર્વજગદ્ધિતાર્થે
જીવેન મારુતયુતેન કૃતપ્રતિષ્ઠમ્ ।
ગુર્વાદિવાયુપુરનાથમનાથનાથં
વાચા નમામિ મનસાં વચસામગમ્યમ્ ॥ ૨॥

વિશ્વપ્રકાશ ગુરુવાયુકૃતપ્રતિષ્ઠ
ક્ષેત્રજ્ઞરૂપ પરમેશ્વર વિશ્વબન્ધો ।
આનન્દરૂપ જગતાં સ્થિતિસૃષ્ટિ હેતો
સ્વાત્માનમેવ ભગવન્તમભીષ્ટવીમિ ॥ ૩॥

માયાગૃહીતવિધિવિષ્ણુમહેશરૂપ
સૂત્રાત્મ વાયુગુરુગેહગ વિશ્વરૂપ ।
વિશ્વોદ્ભવપ્રલયકેલિષુલોલ ભૂમન્
બ્રહ્માત્મરૂપ બહુરૂપ નમો નમસ્તે ॥ ૪॥

માયામહાજવનિકાપિહિતાત્મદૃષ્ટિઃ
વિશ્વોદ્ભવ પ્રલયકેલિષુ જાગરૂકમ્ ।
નિત્યપ્રબુદ્ધમપિ બોધયિતું પ્રવૃત્તઃ
સૂર્યં તમોવૃતમવૈતિ તમોઽન્ધદૃષ્ટિઃ ॥ ૫॥

નિદ્રા ન તેઽસ્તિ જિતમાય સદાઽપ્રમેય
માયાપ્રપઞ્ચનવનાટકસૂત્રધારિન્ ।
લોકાનુસારવિધાય નનુ બોધ્યસે ત્વં
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૬॥

શ્રીવ્યાસનારદસનન્દસનત્કુમાર-
દુર્વાસગર્ગકપિલાદ્યખિલા મુનીન્દ્રાઃ ।
પ્રાપ્તા હરે તવ પદામ્બુજદર્શનાર્થં
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૭॥

પ્રત્યૂષપૂજનરતાઃ કિલ પૂજકાસ્તે
પુષ્પોપહારતુલસીદધિદુગ્ધહસ્તાઃ ।
સમ્બોધયન્તિ ભગવન્ શ્રુતિસૂક્તપાઠૈઃ
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૮॥

ભક્તા જનાઃ સુકદલીફલશર્કરાદિ
હૈયઙ્ગવીનપૃથુકાન્વિતલાજપૂપાન્ ।
તુભ્યં નિવેદયિતુમદ્ય સમાગતાસ્તે
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૯॥

વાતાદિરોગપરિપીડિતસર્વગાત્રાઃ
દૂરાત્સમેત્ય સતતં ત્વયિ ભક્તિયુક્તાઃ ।
કૃષ્ણાચ્યુતાઘહરણામ્બુજનાભ વિષ્ણો
નારાયણામ્બુજભવાદિનિષેવિતાઙ્ઘ્રે ।
માં પાહિ વાતપુરનાથ સમીરયન્તિ
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૦॥

દૂરાત્સમેત્ય મનુજાસ્તવ ચક્રતીર્થે
સ્નાત્વા વિશુદ્ધહૃદયાઃ ફલપુષ્પહસ્તાઃ ।
ત્વત્પુણ્યનામગણજાપરતા ભજન્તે
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૧॥

ત્વાં દેવકી ચ વસુદેવસુતશ્ચ નન્દઃ
સુપ્તપ્રબુદ્ધમિહ દુગ્ધકરા યશોદા ।
ત્વત્પ્રેમભારભરિતાઃ પ્રતિપાલયન્તિ
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૨॥

માયાત્તદેહ મધુસૂદન વિશ્વમૂર્તે
કાયાત્તવાર્ચિતપદામ્બુજ પુણ્યકીર્તે ।
રાધાધરસ્થમધુલોલુપ રમ્યમૂર્તે

વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૩॥

મીનાકૃતે શ્રુતિસમુદ્ધરણાય પૂર્વં
કૂર્માકૃતે ગિરિસમુદ્ધરણાય પશ્ચાત્ ।
કોલાકૃતે ક્ષિતિસમુદ્ધરણાય ભૂમન્
ગોપાલ સુન્દર વિભો તવ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીનારસિંહ દિતિજક્ષયહેતુભૂત
પ્રહ્લાદરક્ષક વિભો વટુવામનાખ્ય ।
શ્રીરામ ભાર્ગવ હલાયુધ કૃષ્ણ કલ્કિન્
વાતાલયેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૫॥

શ્રીકૃષ્ણ વૃષ્ણિવર યાદવ રાધિકેશ
ગોવર્ધનોદ્ધરણ કંસવિનાશ શૌરે ।
ગોપાલ વેણુધર પાણ્ડુસુતૈકબન્ધો
શ્રીમારુતાલયવિભો તવ સુપ્રભાતમ્ ॥ ૧૬॥

કૃષ્ણેતિ વર્ણયુગમત્ર સુકીર્તનેન
ભક્તાસ્તરન્તિ ભવસિન્ધુમયત્નતો હિ ।
સત્યેવમેનમતિદીનમુપેક્ષસે કિં
કૃષ્ણાખિલેશ્વર વિભો તવ સુપ્રભાતમ્ ॥ ૧૭॥

નિત્યં ચ ભાગવતવાચનબદ્ધદીક્ષાઃ
ભક્તાઃ કથાશ્રવણકૌતુકિનશ્ચ શૌરે ।
ત્વત્સન્નિધાવનુમતિં કિલ તેઽર્થયન્તે
વાતાલયેશ્વર સુજાગરણં તવાસ્તુ ॥ ૧૮॥ var વિભો તવ સુપ્રભાતમ્ ॥

ભક્તાન્ વિલોકય દૃશા કરુણાર્દ્રયા ત્વં
આશ્વેવ તાનનુગૃહાણ કૃતાર્થયેશ ।
ત્વત્પાદયોર્વિતર ભક્તિમચઞ્ચલાં મે
નિત્યં ગૃણામિ વચસા તવ મઙ્ગલાનિ ॥ ૧૯॥

સર્વોપનિષદીડ્યાય નિર્ગુણાય ગુણાત્મને ।
શઙ્કરાભિન્નરૂપાય સચ્ચિદ્રૂપાય મઙ્ગલમ્ ॥ ૨૦॥

સત્યભામાસમેતાય સત્યાનન્દસ્વરૂપિણે
રુક્મિણીપ્રાણનાથાય લોકપૂજ્યાય મઙ્ગલમ્ ॥ ૨૧॥

રાધાધરમધુપ્રીતમાનસાય મહાત્મને
ગોપગોપીસમેતાય ગોપાલાયાસ્તુ મઙ્ગલમ્ ॥ ૨૨॥

મઙ્ગલં વેદવેદ્યાય વાસુદેવાય મઙ્ગલમ્ ।
મઙ્ગલં પદ્મનાભાય પુણ્યશ્લોકાય મઙ્ગલમ્ ॥ ૨૩॥

મઙ્ગલં પરમાનન્દબ્રહ્મરૂપાય મઙ્ગલમ્ ।
ગુરુવાયુપુરેશાય શ્રીકૃષ્ણાયાસ્તુ મઙ્ગલમ્ ॥ ૨૪॥

ઇતિ શ્રીગુરુવાયુપુરેશસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com and
PSA Easwaran psaeaswaran at gmail.com

---

*Shri Guruvayupuresa Suprabhatam*
pdf was typeset on December 1, 2018

Please send corrections to *sanskrit@cheerful.com*